# Brahmaproktam Shamaptum Shankararchanopadesham

# બ્રહ્માપ્રોક્તં શમાપ્તું શઙ્કરાર્ચનોપદેશમ્

## Document Information

Text title : Brahmaproktam Shamaptum Shankararchanopadesham

File name : brahmAproktaMshamAptuMshankarArchanopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 25| 135-148||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 16, 2024

*sanskritdocuments.org*

# બ્રહ્માપ્રોક્તં શમાપ્તું શઙ્કરાર્ચનોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

- બ્રહ્મા ઇન્દ્ર સંવાદે -

બ્રહ્મોવાચ

ઇન્દ્રાદ્ય ન ત્વયા સમ્યક્ પૂજિતઃ પાર્વતીપતિઃ ।
તેનૈવ વ્યાકુલં જાતં તવ ચિત્તમનાકુલમ્ ॥ ૧૩૫॥

યેન ન ક્રિયતે નિત્યં યથાવિધિ શિવાર્ચનમ્ ।
તેન દુઃખાનિ સર્વાણિ પ્રાપ્યન્તે નાત્ર સંશયઃ ॥ ૧૩૬॥

દુઃખાલયા ભવન્ત્યેવ સર્વે ત્યક્ત શિવાર્ચનાઃ ।
ત્યક્તેશપૂજનૈરેવ પ્રાપ્યતે દુઃખમન્વહમ્ ॥ ૧૩૭॥

શઙ્કરં શઙ્કરં નિત્યં યો નાર્ચયતિ સાદરમ્ ।
ન તસ્ય સુખલેશોઽપિ સત્યં સત્યં ન સંશયઃ ॥ ૧૩૮॥

યથા દુઃખવશં યાન્તિ શઙ્કરેતરપૂજકાઃ ।
તથા દુઃખવશં યન્તિ ત્યક્તશઙ્કરપૂજનાઃ ॥ ૧૩૯॥

શઙ્કરં સમ્યગારાધ્ય પ્રાપ્નુવન્તીશમન્વહમ્ ।
શઙ્કરારાધને ત્યક્તે કથં શમુપલભ્યતે ॥ ૧૪૦॥

શઙ્કરાર્ચનમેવૈકં પરમાનન્દસાધનમ્ ।
તદન્યન્ન શ્રુતં વજ્રિન્પરમાનન્દસાધનમ્ ॥ ૧૪૧॥

દેવેષ્વન્યેષુ વા વજ્રિન્ શઙ્કરાન્યો ન શઙ્કરઃ ।
તતઃ શમાપ્તું કુર્વન્તિ શઙ્કરારાધનં દ્વિજાઃ ॥ ૧૪૨॥

શમાપ્તું યતતે યસ્તુ વિના શઙ્કરપૂજનમ્ ।
સ મૂર્ખ ઇતિ વિજ્ઞેયો નેતરો મૂર્ખ ઉચ્યતે ॥ ૧૪૩॥

કાયેન મનસા વાચા યે શઙ્કરમુપાસતે ।

તે પણ્ડિતા ઇતિ જ્ઞેયાઃ પૂજ્યાસ્તે ધનિભિર્ધનૈઃ ॥ ૧૪૪॥

શઙ્કરાસક્તચિત્તાનાં ન દૂરે શં તતઃ સદા ।
શઙ્કરારાધનં કાર્યં શમર્થિભિરહર્નિશમ્ ॥ ૧૪૫॥

સ્વર્ગાપવર્ગફલદં શઙ્કરં લોકશઙ્કરમ્ ।
યે પૂજયન્તિ સતતં ધન્યાસ્તે નાત્ર સંશયઃ ॥ ૧૪૬॥

ભગવાન્પાર્વતીનાથઃ સર્વાભીષ્ટફલપ્રદઃ ।
સ એવ પૂજ્યતે નિત્યં તસ્ય દુઃખં ન સર્વથા ॥ ૧૪૭॥

બહવો મુનયઃ પૂર્વમુમાકાન્તસ્ય પૂજયા ।
દુઃખપાશવિનિર્મુક્તાઃ શઙ્કરં સમુપાયયુઃ ॥ ૧૪૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે બ્રહ્માપ્રોક્તં શમાપ્તું શઙ્કરાર્ચનોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૫ । ૧૩૫-૧૪૮॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 25 . 135-148..

Proofread by Ruma Dewan

---

*Brahmaproktam Shamaptum Shankararchanopadesham*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*